# 6 - षष्ट दशकम्

# विराट् स्वरूप वर्णनम्

एवं चतुर्दश जगन् मयतां गतस्य
पाताल मीश तव पादतलं वदन्ति ।
पादोर्ध्व देश मपि देव रसातलं ते
गुल्फ द्वयं खलु महातल मद्भुतात्मन् ॥ ॥6-1॥

जङ्घे तलातल मथो सुतलं च जानू
किञ्चोरु भाग युगलं वितला तले द्वे ।
क्षोणी तलं जघन मम्बर मङ्ग नाभिः
वक्षश्च शक्र निलयस् तव चक्रपाणे ॥ ॥6-2॥

ग्रीवा महस् तव मुखं च जनस् तपस्तु
फालं शिरस् तव समस्त मयस्य सत्यम् ।
एवं जगन्मय तनो जगदाश्रितै रपि
अन्यैर् निबद्ध वपुषे भगवन् नमस्ते ॥ ॥6-3॥

त्वत् ब्रह्मरन्ध्र पदमीश्वर विश्वकन्द
छन्दांसि केशव घनास् तव केश पाशाः ।
उल्लासि चिल्लि युगलं द्रुहिणस्य गेहं
पक्ष्माणि रात्रि दिवसौ सविता च नेत्रे ॥ ॥6-4॥

निश्शेष विश्व रचना च कटाक्ष मोक्षः
कर्णौ दिशोऽश्वि युगलं तव नासिके द्वे ।
लोभ त्रपे च भगवन् अधरोत्त रोष्ठौ
तारा गणाश्च दशनाश् शमनश्च दंष्ट्रा ॥ ॥6-5॥

माया विलास हसितं श्वसितं समीर:
जिह्वा जलं वचन मीश शकुन्त पङ्क्ति: ।
सिद्धादयस् स्वर गणा मुख रन्ध्र मग्नि:
देवा भुजास् स्तन युगं तव धर्मदेव: ॥ ॥6-6॥

पृष्ठन्त्वधर्म इह देव मनस् सुधांशु:
अव्यक्त मेव हृदयांबुज मम्बुजाक्ष ।
कुक्षिस् समुद्र निवहा वसनं तु सन्ध्ये
शेफ: प्रजापति रसौ वृषणौ च मित्र: ॥ ॥6-7॥

श्रोणी स्थलं मृग गणा: पदयोर् नखास्ते
हस्त्युष्ट्र सैन्धव मुखा गमनं तु काल: ।
विप्रादि वर्ण भवनं वदनाब्ज बाहु
चारूरु युग्म चरणं करुणांबुधे ते ॥ ॥6-8॥

संसार चक्र मयि चक्रधर क्रियास्ते
वीर्यं महा सुरगणोऽस्थि कुलानि शैला: ।
नाड्यस् सरित् समुदयस् तरवश्च रोम
जीया दिदं वपुरनि र्वचनीय मीश ॥ ॥6-9॥

ईद्दग् जगन्मय वपुस् तव कर्म भाजां
कर्मावसान समये स्मरणीय माहु: ।
तस्यान्तरात्म वपुषे विमलात्मने ते
वातालयाधिप नमोऽस्तु निरुन्धि रोगान् ॥ ॥6-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥